# Shri Kalpakambika mangalastotram

# શ્રીકલ્પકામ્બિકા મઙ્ગલસ્તોત્રમ્

## Document Information

Text title : Kalpakambika Mangala stotram

File name : kalpakAmbikAmangalastotram.itx

Category : mangala, devii, devI, otherforms

Location : doc_devii

Author : sheShashAyIsharmA

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : July 2, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીકલ્પકામ્બિકા મઙ્ગલસ્તોત્રમ્

ઓઙ્કારસ્વરમૂલાયૈ ઓઙ્કારાધારરૂપિણિ
મયિલાપુર ભાગ્યમૂલે કલ્પકે તે સુમઙ્ગલમ્ ॥ ૧॥

ઐં વાગ્વિલાસદાયિન્યૈ કપાલિહૃદયેશ્વરિ ।
વાર્ધિતીરગૃહં દત્તં કલ્પકે તે સુમઙ્ગલમ્ ॥ ૨॥

ક્લીઙ્કારગુપ્તમાયેશિ પુંસ્ત્વે ત્વં કૃષ્ણવિગ્રહા ।
ક્ષીરવાર્ધિમાહાગેહે કલ્પકે તે સુમઙ્ગલમ્ ॥ ૩॥

સૌં બીજગતશક્ત્યાખ્યસુન્દરિ ભુવને શિવે ।
હિમવદ્ભાગ્યસમ્ભૂતે કલ્પકે તે સુમઙ્ગલમ્ ॥ ૪॥

નૃત્યદ્ગણેશસન્તુષ્ટે સ્કન્દકોપનિવારણિ ।
જનનિ શબ્દપૂજ્યે તે કલ્પકે તે સુમઙ્ગલમ્ ॥ ૫॥

અસ્પષ્ટયૌવને બાલે મહારાજ્ઞ્યન્તકાન્તકે ।
અભિરામિ મહાભાગે કલ્પકે તે સુમઙ્ગલમ્ ॥ ૬॥

પૂર્ણે પુણ્યતમે પુણ્યે પુણ્યાપુણ્યવિવર્જિતે ।
બ્રહ્મસૂચ્યે બ્રહ્મવાચ્યે કલ્પકે તે સુમઙ્ગલમ્ ॥ ૭॥

કાલસ્વભાવવિહિતજન્મમૃત્યુજરાન્તકે ।
આદિમાતર્નમસ્યન્ ત્વામર્પયેઽત્ર સુમઙ્ગલમ્ ॥ ૮॥

મન્દસ્મિતમહાસૂત્રબદ્ધમાહેશ્વરેશ્વરિ ।
મહાયાસવિનાશાય કલ્પકે તેઽસ્તુ મઙ્ગલમ્ ॥ ૯॥

વિષાશનાચ્ચિરઞ્જીવી બભૂવ શશિશેખરઃ ।
ત્વદ્વીક્ષણવિશેષેણ તસ્માત્તેઽસ્તુ સુમઙ્ગલમ્ ॥ ૧૦॥

બાલાપાદસરોજાક્તશેષશાયિકૃતં હરિઃ ।
મઙ્ગલં કલ્પકામ્બાયાઃ કરોતુ શુભદં સદા ॥ ૧૧॥

ઇતિ વાધૂલગોત્રોદ્ભવેન શ્રીવેઙ્કટેશ્વરાર્યસ્ય
પુત્રેણ શ્રીશેષશાયીશર્માખ્યેન વિરચિતં
શ્રીકલ્પકામ્બિકામઙ્ગલસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by PSA Easwaran

*Shri Kalpakambika mangalastotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*